INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY ADVANCED RESEARCH TRENDS
ISSN : 2349-7408
VOLUME II, ISSUE 1(5), JUNE 2015

# समासविषयकानि विविधानि मतान्तराणि

**SUMALATHA PASUMARTHI**
Research Scholar, Dept of Sanskrit & Indian Culture
SCSVMV University, Enathur, Kanchipuram

सम् (उपसर्ग) पूर्वकाद् अस् (सत्तार्थक) इति धातोः समसनमिति व्युत्पत्तौ 'भावे' (अ.3/3/18) इत्यनेन भावे समस्यतेऽनेकपदमिति व्युत्पत्तौ, 'अकर्तरि च कारके संज्ञायाम्' (अ.3/3/19) इत्यनेन कर्मणि, समस्यतेऽस्मिन्निति व्युत्पत्तौ 'हलश्च' (अ.3/3/121) इत्यनेनाधिकरणे वा घञ् प्रत्यये सति समासशब्दो निष्पद्यते।

**समासभेदाः**

समासभेदविषये सन्ति विविधानि मतान्तराणि। तत्र क्रमेण कानिचिद्दर्श्यन्ते -

**1.केचिदाचार्या द्विविधं समासं वर्णयन्ति लुक्समासोऽलुक्समासश्च।** यत्र सुब्विभक्तेर्लुग् भवति स लुक् समास उच्यते। तथाहि -

**अव्ययीभावः** - दिशयोर्मध्ये अपदिशम्।

**तत्पुरुषः** - दुःखमतीतो दुःखातीतः।

**बहुव्रीहिः** - पीतमम्बरं यस्य स पीताम्बरो हरिः।

**द्वन्द्वः** - हरिश्च हरश्च हरिहरौ।

यत्र च सुबविभक्तेर्लुग् न भवति, सोऽलुक्समास उच्यते। यथा -

**तृतीयातत्पुरुषः** - पुंसानुजः मनसादेवी, जनुषान्धः, हस्तिनापुरम्।

**चतुर्थीतत्पुरुषः** - परस्मैपदम्, परस्मैभाषा, आत्मनेपदम्, आत्मनेभाषा।

**पञ्चमीतत्पुरुषः** - स्तोकान्मुक्तः, दूरादागतः।

**षष्ठीतत्पुरुषः** - देवानांप्रियः, दास्याः पुत्रः, वाचोयुक्तिः, शुनःशेप इत्यादि।

**सप्तमीतत्पुरुषः** - त्वचिसारः, कर्णेजपः, अरण्येतिलकः, सरसिजम्, हृदिस्पृक्।

**बहुव्रीहिः** - कण्ठेकालः, उरसिलोमा, अप्सुयोनिः।

**सहसुपा** - जीमूतस्येव, वागर्थाविव।

अव्ययीभावे द्वन्द्वसमासे चालुक् उदाहरणं न दृश्यते, तस्मात् तत्राव्ययीभावे द्वन्द्वे च लुक्समास एव भवति। अग्नीषोमौ, जनमेजय इत्यादौ द्वितीयाया नायमलुक्, किन्तु

तयोरीदादेशमुमागमादिकार्यविधानेन निष्पत्तेः सत्त्वात् तत्र प्रथमा द्वितीया वा प्रतीयते। एतेन तत्रालुक्समासाभाव एवावगन्तव्यः।

लुगलुगिति शब्देन भेदद्वयं समासस्य वाररुचसङ्ग्रहे निर्दिष्टम् -

**षोढाः समासाः सङ्क्षेपादष्टविंशतिधा पुनः।**

**नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा।।**

**2.प्रकारान्तरेणापि समासोऽयं द्विविध उच्यते - नित्योऽनित्यश्चेति।** यत्र समासार्थस्य विग्रहवाक्येन प्रतीतिर्न भवति स नित्यसमासो भवति। लौकिकविग्रहरहितः समस्यमानपदसमानार्थकपदान्तकृतविग्रहो वा नित्यसमास (अविग्रहो नित्यसमासः, अस्वपदविग्रहो वा (सि.कौ.सर्वसमासशेषप्रकरणम्)) इत्यर्थः। अयं भावः - समस्तपदानां योऽर्थः स समासान्तर्गतशब्दोत्तरं विभक्तियोगमात्रेण यत्र नावबुध्यते तत्र नित्यसमासः प्रवर्तते। यथोक्तम् -

**विभक्तिमात्रप्रक्षेपान्निजान्तर्गतनामसु।**

**स्वार्थस्याबोधबोधाभ्यां नित्यानित्यसमासकौ।।** इति।

नित्यः कर्मधारयसमासो यथा - कृष्णसर्पः भेषजादिभिरुपायैरनिवार्यः सर्पविशेषः। अयमर्थः - कृष्णश्चासौ सर्पश्चेति विग्रहवाक्येन नावबुध्यते तेन च केवलं कृष्णवर्णविशिष्टः कश्चित् सर्प इत्येवार्थोऽवगम्यते, न तूपरि दर्शित ईप्सितः। कृष्णसर्प इति समासोक्त्या कृष्णवर्णातिरिक्तोऽपि कश्चिद् महाविषो जातिविशेषः प्रतीयते।

अव्ययीभाव - निर्मक्षिकम् = जनहीनस्थानम्। अयमर्थो मक्षिकाणामभाव इति विग्रहवाक्येन नावबुध्यते, तेन च केवलं मक्षिकाभाव एवाबुध्यते। नञ् तत्पुरुषः - असुरः = सुरविरोधी। अयमर्थः न सुर इति विग्रहवाक्येन नावबोधयितुं शक्यते, किं च तेन केवलं सुरस्य निषेधोऽवगम्यते।

**एवं नित्यसमासोऽयं पाणिनिसम्प्रदाये त्रिविधो दृश्यते -**

(क) विभाषा (अष्टाध्यायी.1/11) इत्यधिकारात् पूर्वं निर्दिष्टः 'अव्ययं विभक्तिसमीप' (अ.2/1/6) इत्यादिसूत्रैः। तथाहि- अधिस्त्रि, अधिकुमारि, यथावृद्धम्, अक्षपरि, शलाकापरीत्यादि।

(ख) नित्यं क्रीडाजीविकयोः (अ.2/2/17) इति सूत्र एव नित्यपदोपादानात्। तथाहि - उद्दालकपुष्पभञ्जिका, दन्तलेखकः, नखलेखकः इत्यादि वाक्येन संज्ञायाः कस्याश्चिदनवगमात् तत्रापि नित्यः समासः (संज्ञा समुदायोपाधिः। तेन नित्य समास एवायं न हि वाक्येन संज्ञा गम्यते (काशिकावृत्ति.2/1/44)) - अरण्येतिलकाः, अरण्येमाषाः, वनेकिंशुकाः, वनेबिल्वकाः, कूपेपिशाचकाः (संज्ञायाम्, अ.2/1/44)। पूर्वेषुकामशमी, अपरेषुकामशमी, पञ्चाम्राः, सप्तर्षयः (दिक् संख्ये संज्ञायाम् अ.2/1/50)।

(ग) यत्र शोभनाद्यर्थप्रतिपादनेऽसमर्थाः स्वादयोऽभिमताः, तेन च शोभनादिशब्दैरेव विग्रहः क्रियते। उक्तञ्च - अत्र स्वादीनां विग्रहवाक्यस्थानां शोभनाद्यर्थप्रतिपादनसामर्थ्याभावादन्येन

विग्रहप्रदर्शनात् सामर्थ्याद् वाक्याभावलक्षणं नित्यत्वम् (वार.सं.नारा.भ.) इति। तद्यथा - शोभने राजा सुराजा, अतिराजा।

यो हि समासपदार्थः, स च यदि समासघटकपदैर्विग्रहवाक्येनाप्यवगम्यते तदा समासोऽनित्योऽभिमन्यते। यथा- राज्ञः पुरुषः राजपुरुषः। पूर्वं कायस्य पूर्वकाय इत्यादि। अत्र वाक्यसमासाभ्यां समानार्थवगतिर्भवति।

**3.त्रिविधः समासः क्वचिदुच्यते - (1)नित्यः, (2)अनित्यः (3)विवक्षाभावरूपश्च।** क्वचिन्नित्यः समासः। यत्र विग्रहवाक्यस्थपदैरिष्टार्थो नावबुध्यते, तत्र समासेनावबोधोऽङ्गीक्रियते। यथा - कृष्णसर्पः, देवानांप्रियः इत्यादि।

क्वचिद् विकल्पः समासः। सामान्यतः सर्वत्र विकल्पः समासः प्रवर्तते। यथा द्वन्द्वे - हरिश्च हरश्च जयति, हरिहरौ जयतः। बहुव्रीहौ - चत्वारो भुजा यस्य तस्मै नमः, चतुर्भुजाय नमः। कर्मधारये - नीलमुत्पलमिदम्, नीलोत्पलमिदम्। षष्ठीतत्पुरुषे - विष्णोर्भक्तोऽयम् विष्णुभक्तोऽयम्। द्विगौ - पञ्चभिर्गोभिः क्रीतोऽयम्, पञ्चगुः। अव्ययीभावे - कृष्णमधिकृत्य कथा अधिकृष्णं कथा।

क्वचित् समर्थपदानामपि समासो नेष्यते, विवक्षाभावात् यथा - रामो जामदग्न्यः, व्यासः पाराशर्यः, अर्जुनः कार्तवीर्य इत्यादि। समासो ह्यभिधानलक्षणो भवतीत्याचार्यैः स्वीक्रियते। यतोहि प्रयुक्तानामेवान्वाख्यानं व्याकरणशास्त्रेण क्रियत इत्यसकृत् महाभाष्यादावुक्तम्। अत एव विशेषणविशेष्ययोर्व्यभिचारे नीलोत्पलादौ समासः प्रवर्तते। तक्षकः सर्प इत्यादौ विशेषण विशेष्ययोर्व्यभिचाराभावे समासाभावोऽपि दृश्यते। कैलासाद्रिः, व्याकरणशास्त्रम्, भावपदार्थ इत्यादौ व्यभिचाराभावेऽपि समासः।

एतेनेदं ज्ञायते - समर्थाश्रितो विधिस्त्रिविधो भवति कुत्रचिन्नित्यः, कुत्रचिद् विकल्पेन, कुत्रचित् सर्वथा तदभाव इति। तत्रैवं सिद्धान्तः - यत्र व्यपेक्षा तत्र वाक्यम् यत्रैकार्थीभावस्तत्र समासः यत्रोभयं तत्र विकल्पः। यतो हि समर्थः पदविधिः, इति सामर्थ्यपदेनैकार्थीभावस्यैव ग्रहणमिति तत्रैव सूत्रे भाष्ये स्पष्टम्। तत्र कुत्र व्यपेक्षा, कुत्रैकार्थीभावः, कुत्रोभयमेतज्ज्ञानायैव विभाषाधिकारः, नित्यमित्यस्य ग्रहणम्, निषेधसूत्राणि च।

**4.प्राचीनवैयाकरणानां मते समासश्चतुर्धा भवति - 1.अव्ययीभावः, 2.तत्पुरुषः, 3.द्वन्द्वः, 4.बहुव्रीहिश्चेति।** समासस्यायं चतुर्धा विभागः पूर्वोत्तरोभयान्यपदार्थानां प्राधान्यमभिलक्ष्याङ्गीकृत आचार्यैः। उच्यते च महाभाष्ये - इह क्वचित् समासः पूर्वपदार्थप्रधानः, कश्चिदुत्तरपदार्थप्रधानः, कश्चिदन्यपदार्थप्रधानः. कश्चिदुभयपदार्थप्रधानः। पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानतत्पुरुषः, अन्यपदार्थप्रधानो बहुव्रीहिः, उभयपदार्थप्रधानो द्वन्द्वः (महाभाष्यम्.2/1/6) इति। परमिदं पूर्वादिपदार्थप्राधान्यमव्ययीभावादीनां न लक्षणम्, किन्तु प्रायेणेदृश एवोपलभ्यते स्थलविशेषेव्यभिचारस्य दृष्टत्वात्। तथा हि -

सूपस्य लेशः सूपप्रति इत्यत्राव्ययीभावसमासः, परं तत्रोत्तरपदार्थस्य प्राधान्यं दृश्यते न तु पूर्वपदार्थस्य सूपस्येति। (सूप्रतिना मात्रार्थे अ.2/1/9) इति समासः। एवमुन्मत्ता गङ्गा यस्मिन्

देशे स उन्मत्तगङ्गं नाम देशः। अत्रान्यपदार्थस्य देशविशेषस्य प्राधान्येऽपि प्रवृत्तेऽव्ययीभावसमासः (अन्यपदार्थे च संज्ञायाम् 2/1/21) इति सूत्रेण।

'पिप्पल्या अर्धमर्धपिप्पली' इत्यत्र तत्पुरुषसमासः, अर्धार्थस्य प्राधान्यादत्र पूर्वपदार्थप्रधानस्तत्पुरुषो दृश्यते (अर्धं नपुंसकम् अ.2/2/2) इति समासः।

'द्वित्राः' इत्यत्र बहुव्रीहावुभयपदार्थप्राधान्यं दृश्यते। एवमत्र बहुव्रीहेरव्याप्तिः, द्वन्द्वस्य चातिव्याप्तिः प्रसज्यते।

'शशकुशपलाशम्' इत्यादौ समाहाररूपान्यपदार्थस्य प्राधान्याद् बहुव्रीहेरतिव्याप्तिः, उभयपदार्थप्रधानरूपद्वन्द्वस्य चाव्याप्तिः प्रसक्ता।

एवं चतुर्विधेषु समासेष्विदमेव लक्षणमङ्गीकर्तव्यम्। अव्ययीभावादितत्तत्समासाधिकारे पठितत्वमव्ययीभावादि तत्तत्समासत्वमिति। तेन चोक्तोऽव्याप्त्यतिव्याप्तिदोषो वार्यते। उच्यते च -

**समासस्तु चतुर्धेति प्रायोवादस्तथापरः,**

**योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च।**

**भौतपूर्व्यात् सोऽपि रेखागवयादिवदास्थितः।।**

सिद्धान्ते त्वव्ययीभावाधिकारपठितत्वमव्ययीभावत्वमित्यादि द्रष्टव्यम्। वस्तुतस्तु नेदं लक्षणं सम्भवति, किन्तु रेखागवयादिनिष्ठलाङ्गूलादेर्वास्तवलक्षणत्ववदेतेषामपि भौतपूर्व्यात् समासलक्षणत्वम्। बोधकता तु तद्वदेव स्यादिति भावः (वै.भू.सा,का.29-30) इति।

समासचतुष्टयवादिनः कर्मधारयं द्विगुश्च पृथक् समासं नानुमन्यन्ते। ते च 'कर्मधारयसमासस्तत्पुरुषविशेषः, द्विगुश्च कर्मधारयविशेषः' इति व्याचक्षते।

**5.वाभटप्रभृतय आचार्याः समासं पञ्चविधमामनन्ति, 1.पूर्वपदार्थप्रधानः, 2.मध्यपदार्थप्रधानः, 3.अन्त्यपदार्थप्रधानः, 4.सर्वपदार्थप्रधानः, 5.अन्यपदार्थप्रधानश्चेति।**

वाभटादिप्राचीनाचार्याणामभिमतमिदं शब्दशक्तिप्रकाशिकाकारेणोक्तम् -

**पूर्वमध्यान्त्यसर्वान्यपदप्राधान्यतः पुनः।**

**प्राच्यैः पञ्चविधः प्रोक्तः समासो वाभटादिभिः।।** (का.33) इति।

एषां समासभेदानां प्रायोवादमाश्रित्यैव सङ्गतिः कथञ्चिन्नेया। पूर्वपदार्थप्रधानो यथा- अर्धं पिप्पल्या अर्धपिप्पली, पूर्वं कायस्य पूर्वकायः, पाणिनीयसूत्रनिर्देशानुसारेणात्र तत्पुरुषसमासः प्रवर्तते। कुम्भस्य समीपम् उपकुम्भम्, अत्राव्ययीभावः, पुरुषः सिंह इव पुरुषसिंहः, अत्र कर्मधारयः।

**मध्यपदार्थप्रधानः -** पटस्य नाधिकरणमिति पटनाधिकरणम्। अत्र नञर्थोऽभावः स च मध्यपदस्थितः।

**अन्त्यपदार्थप्रधानः -** राज्ञः पुरुषो राजपुरुषः = राजपुरुषः = तत्पुरुषः। नीलमुत्पलमिति नीलोत्पलम् = कर्मधारयः। शाकस्य लेशः शाकप्रति, सप्तानां गङ्गानां समाहारः सप्तगङ्गम् = अव्ययीभावः।

**सर्वपदार्थप्रधानः -** संज्ञापरिभाषम्, पाणिपादम्, गोव्याघ्रम्, युधिष्ठिरार्जुनौ = द्वन्द्वः, इतरेतरसमाहारश्च।

**अन्यपदार्थप्रधानः -** लोहिता गङ्गा यस्मिन् देशे लोहितगङ्गं नामदेशः, तिष्ठन्ति गावो यस्मिन् काले दोहनाय स तिष्ठद्गु कालः, वहन्ति गावो यस्मिन् काले स वहद्गुकालः, खले = उलूखले यवाः क्षिप्यन्ते यस्मिन् काले तत् खलेयवम् = अव्ययीभाव। उष्ट्रमुखमिव मुखं यस्य स उष्ट्रमुखः, अस्ति क्षीरं यस्याः सा अस्तिक्षीरा गौः = बहुव्रीहिः।

वाभटप्रभृतीनां प्राचीनाचार्याणां ग्रन्थानामनुपलब्धिवशात्तत्सम्प्रदायः सम्प्रति लुप्त एवेति तन्मतानि वैयाकरणसम्प्रदाये प्रसिद्धानि न सन्ति।

**6.येह्याचार्याः कर्मधारयं द्विगुश्चापि पृथगङ्गीकुर्वन्ति तेषां मते समासः षोढा। 1.अव्ययीभावः, 2.तत्पुरुषः, 3.कर्मधारयः, 4.द्विगुः, 5.द्वन्द्वः, 6.बहुव्रीहिश्चेति। तदुच्यते।**

**द्विगुर्दन्द्वोऽव्ययीभावः कर्मधारय एव च।**

**पञ्चमस्तु बहुव्रीहिः षष्ठस्तत्पुरुषः स्मृतः।।** इति।

जगदीशतर्कालिङ्कारेणाप्युक्तम् -

**स चायं षड्विधः कर्मधारयादिप्रभेदतः ।** (श.श.प्र.का.32) इति।

प्रयोगरत्नमालाकारेणाप्ययं पन्थाः समादृतः -

**कर्मधारय आद्यः स्याद् द्विगुस्तत्पुरुषोऽपरः।**

**बहुव्रीहिरथ द्वन्द्वोऽव्ययीभावः षडीरिताः।।** (श्लोक 8)

समासभेदानामयं क्रमो नाधिकमादरणीयः, यतो हि कर्मधारयसमासस्तत्पुरुष विशेषः, कर्मधारयविशेषश्च द्विगुरुच्यते। प्रयोगरत्नमालाकारेणोक्तषड्विधानां समासानां सङ्क्षेपेण किञ्चिल्लक्षणमुक्तम्-

**पूर्वेऽव्ययेऽव्ययीभावोऽमादौ तत्पुरुषः स्मृतः।**

**चकारबहुलो द्वन्द्वः सङ्ख्यापूर्वो द्विगुः स्मृतः।।**

**यस्य येन बहुव्रीहिः स चासौ कर्मधारयः।**

**इति किञ्चित् समासानां षण्णां लक्षणमीरितम्।।** (उद्धृ.व्या.द.इति.पृ.194) इति।

भट्टोजिदीक्षितप्रभृतयोऽर्वाचीना आचार्याः प्रकारान्तरेण समासस्य षड्विधत्वमङ्गीकुर्वन्ति। तद्यथा-

**सुपां सुपा, तिङा नाम्ना, धातुनाऽथ, तिङां तिङा।**

**सुबन्तेनेति विज्ञयः समासः षड्विधो बुधैः।।** (वै.भू.सा.का 28) इति ।

**सुपां सुपा सह समासः -** राज्ञः पुरुषो राजपुरुषः, गुरोः कुलं गुरुकुलम् इत्यादि। अत्रपदद्वयमपि राज्ञः पुरुषः इत्येवमादि सुबन्तम्।

**सुपां तिङा सह -** पर्यभूषयत् अनुव्यचलत्। अत्र पूर्वपद 'परि' इति 'अनुवि' इति च सुबन्तम्, उत्तरपदम् अभूषयत्, अचलत् इति तिङन्तम्।

**सुपां नाम्ना सह -** कुम्भं करोतीति कुम्भकारः। अत्र 'कर्मण्यण्' (अ.3/2/1) इति सूत्रेण अण्प्रत्ययो विधीयते, अणन्तो यो हि कुम्भकार शब्दस्तत्र 'उपपदमतिङ्' (अ.2/2/19) इत्यनेनोपपदसमासः प्रवर्तते। स च सुबुत्पत्तेः प्रागेव भवति - गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः (पुरु.परि.वृ.परि.47) इति परिभाषावचनानुसारेण। एवं समासे सञ्जाते कुम्भकार इत्येतस्माच्छब्दात् सुबुत्पत्तिर्जायते.. 'कुम्भकार' इत्यादि।

**सुपां धातुना सह -** कटे=श्मशाने प्रवते=विचरति यः स कटप्रूः। क्विब् वचिप्रच्छ्यायतस्तुकटप्रूजुश्रीणां दीर्घोऽसम्प्रसारणञ्च (म.भा.3/2/178 वा.1-2)। अत्र गत्यर्थक 'प्रू' धातुस्तेन सह कटे इति सुबन्तस्य समासः। आयतं स्तौतीति आयतस्तूः।

**तिङां तिङा सह -** पिबत खादत इति यस्यां क्रियायां सा पिबतखादता। एवं खादतमोदता। अत्र आख्यातमाख्यातेन क्रियासातत्ये (का.वृ.2/1/72 ग.सू.) इति गणसूत्रेण समासः प्रवर्तते। अश्नीतपिबता, पचतभृज्जता इत्यादि।

**तिङां सुबन्तेन सह -** कृन्तविचक्षण इति यस्यां क्रियायां सा कृन्तविचक्षण - हे विचक्षण? कृन्त छिन्धीत्यर्थः। जोडम् (एतन्नामकं सेवकादिकम्) जहि इति अभीक्षणमाह जहिजोडः। जहिस्तम्बः। (जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति (का.वृ.2/1/72 ग.सू.)।

'तिङां सुबन्तेन' इत्यत्र सुबन्तमुत्तरपदम्, 'सुपां तिङा' इत्यत्र तिङन्तमुत्तरपदमिष्यते अन्यथा सुपां तिङा इत्यनेनैवगतार्थत्वात् पञ्चविध एव समासः स्यात्।

**7.सप्तविधमपि समासं केचिदङ्गीकुर्वन्ति। ते च नित्यसमासं पृथगामनन्ति। एतेन – 1.अव्ययीभावः, 2.तत्पुरुषः, 3.कर्मधारयः, 4.द्विगुः, 5.द्वन्द्वः, 6.बहुव्रीहिः, 7.नित्यश्चेति सप्त भेदाः समासस्य भवन्ति।** उच्यते चापि -

**द्वन्द्वो द्विगुरपि चाह मद्गेहे नित्यमव्ययीभावः।**

**तत्पुरुष कर्मधारय येनाहं स्यां बहुव्रीहिः।।** इति।

केचिद् उपपदसमासं सप्तमं भेदमाकलयन्ति। अत एव शब्दशक्तिप्रकाशिकायामुच्यते -

**यश्चोपपदसंज्ञोऽन्यस्तेनासौ सप्तधा मतः।** (का.32) इति।

उपपदसमास उपरि दर्शितम् – कुम्भकारः इत्यादि।

**8.एष षड्विधानां सप्तविधानां वा समानामवान्तरैः कैश्चिद् भेदैः समासोऽयमष्टाविंशतिविधः सम्पद्यते।** उच्यते चापि -

**षोढा समासं वक्ष्यामि अष्टाविंशतिधा पुनः।** (अ.पु.अ.355) इति।

वाररुचसङ्ग्रहे - तत्पुरुषादेर्भेदा एवमुक्ताः -

**तत्राष्टधा तत्पुरुषः षड्विधः कर्मधारयः।**

**षड्विधश्च बहुव्रीहिर्द्विगुराभाषितो द्विधा।।**

**द्वन्द्वश्चतुर्विधो ज्ञेयोऽव्ययीभावो द्विधा मतः।।** इति।

**तत्पुरुषस्याष्टौ भेदाः -** 1.प्रथमातत्पुरुषः, 2.द्वितीयातत्पुरुषः, 3.तृतीयातत्पुरुषः, 4.चतुर्थीतत्पुरुषः, 5.पञ्चमीतत्पुरुषः, 6.षष्ठीतत्पुरुषः, 7.सप्तमीतत्पुरुषः, 8.नञ् तत्पुरुषः।

**कर्मधारय षड्भेदाः -** 1.सामान्यकर्मधारयः, 2.विशेषकर्मधारयः, 3.कुत्सितपूर्वपदकर्मधारयः, 4.उपमानपूर्वपदकर्मधारयः, 5.उपमितपूर्वपदकर्मधारयः, 6.वर्णोभयपदकर्मधारयश्च।

**बहुव्रीहेः षड्भेदाः -** 1.तद्गुणसंविज्ञानबहुव्रीहिः, 2.अतद्गुणसंविज्ञानबहुव्रीहिः, 3.सङ्ख्योत्तरपदबहुव्रीहिः, 4.अन्तरालाभिधेयकबहुव्रीहिः, 5.सरूपोपलक्षितबहुव्रीहिः, 6.सहपूर्वपदबहुव्रीहिः।

**द्विगोर्द्वौ भेदौ -** 1.एकवद्भावद्विगुः, 2.अनेकवद्भावद्विगुः।

**द्वन्द्वश्चतुर्विधः -** 1.द्विपदेतरेतरद्वन्द्वः 2.बहुपदेरेतरद्वन्द्वः 3.द्विपदसमाहारद्वन्द्वः, 4.बहुपदसमाहारद्वन्द्वः।

**अव्ययीभावो द्विविधः -** 1.अव्ययपूर्वपदाव्ययीभावः, 2.नामपूर्वपदाव्ययीभावः इति।

समस्यते अनेन इति समासः एकपदीकरणं वा समासः इति यत्किमपि समासस्य संज्ञा भवतु नाम तथापि संस्कृतव्याकरणशास्त्रे समासस्य भेदम् अधिकृत्य ये ये भेदाः प्रभेदाः उपरि प्रदर्शिताः तत्सर्वं अस्माकं व्याकरणशास्त्रमङ्गीकृत्यैव प्रतिपादिताः सन्ति। अत एव मुख्यभेदाः प्रदर्शिताः प्रत्येकस्य मुख्यस्य समासस्य गौणाभेदाः अपि निरूपिताः सन्ति अस्मिन् शोधपत्रे। यत्किमपि भवतु नाम शोधपत्रमिदं पठ्यते अवगम्यते चेत् समासमधिकृत्य तस्य लक्षणं तथा भेदविषये न्यूनाधिन्यूनं किञ्चित् ज्ञानं अवश्यं भविष्यति इति मनसि विचार्य शोधपत्रमिदं मया प्रस्तुतम्। इति शम्।